न शब्दोबोधिसत्त्वइति। नाऽन्यत्र शब्दाद्बोधिसत्त्वइति। न शब्दे बोधिसत्त्वइति। न बोधिसत्त्वे शब्दइति। नाऽशब्दो बोधिसत्त्वइति। न गन्धोबोधिसत्त्वइति। नाऽन्यत्र गन्धाद्बोधिसत्त्वइति। न गन्धे बोधिसत्त्वइति। न बोधिसत्त्वे गन्धइति। नाऽगन्धोबोधिसत्त्वइति। न रसोबोधिसत्त्वइति। नाऽन्यत्र रसाद्बोधिसत्त्वइति। न रसे बोधिसत्त्वइति। न बोधिसत्त्वे रसइति। नाऽरसो बोधिसत्त्वइति। न स्पर्शो बोधिसत्त्वइति। नाऽन्यत्र स्पर्शाद्बोधिसत्त्वइति। न स्पर्शे बोधिसत्त्वइति। न बोधिसत्त्वे स्पर्शइति। नाऽस्पर्शोबोधिसत्त्वइति। न धर्माबोधिसत्त्वइति। नाऽन्यत्र धर्मेभ्योबोधिसत्त्वइति। न धर्मेषु बोधिसत्त्वइति। न बोधिसत्त्वे धर्माइति। नाऽधर्मा बोधिसत्त्वइति। न चक्षुर्धातुर्बोधिसत्त्वइति। नाऽन्यत्र चक्षुर्धातोर्बोधिसत्त्वइति। न चक्षुधातो बोधिसत्त्वइति। न बोधिसत्त्वे चक्षुर्धातुरिति। नाऽचक्षुर्धातुर्बोधिसत्त्वइति। न रूपधातुर्बोधिसत्त्वइति। नाऽन्यत्र रूपधातोर्बोधिसत्त्वइति। न रूपधातौ बोधिसत्त्वइति। न बोधिसत्त्वे रूपधातुरिति। नाऽरूपधातुर्बोधिसत्त्वइति। न चक्षुर्विज्ञानधातुर्बोधिसत्त्वइति। नाऽन्यत्र चक्षुर्विज्ञानधातोर्बोधिसत्त्वइति। न चक्षुर्विज्ञानधातौ बोधिसत्त्वइति। न बोधिसत्त्वे चक्षुर्विज्ञानधातुरिति। नाऽचक्षुर्विज्ञानधातुर्बोधिसत्त्वइति। न श्रोत्रधातुर्बोधिसत्त्वइति। नाऽन्यत्र श्रोत्रधातोर्बोधिसत्त्वइति। न श्रोत्रधातौ बोधिसत्त्वइति। न बोधिसत्त्वे श्रोत्रधातुरिति। नाऽश्रोत्रधातुर्बोधिसत्त्वइति। न शब्दधातुर्बोधिसत्त्वइति। नाऽन्यत्र शब्दधातोर्बोधिसत्त्वइति। न शब्दधातौबोधिसत्त्वइति।

न बोधिसत्त्वे शब्दधातुरिति। नाऽशब्दधातुर्बोधिसत्त्वइति। न श्रोत्रविज्ञानधातुर्बोधिसत्त्वइति। नाऽन्यत्र श्रोत्रविज्ञानधातोर्बोधिसत्त्वइति। न श्रोत्रविज्ञानधातौ बोधिसत्त्वइति। न बोधिसत्त्वे श्रोत्रविज्ञानधातुरिति। नाऽश्रोत्रविज्ञानधातुर्ब्बोधिसत्त्वइति। न घ्राणधातुर्ब्बोधिसत्त्वइति। नाऽन्यत्र घ्राणधातोर्बोधिसत्त्वइति। न घ्राणधातौ बोधिसत्त्वइति। न बोधिसत्त्वे घ्राणधातुरिति। नाऽघ्राणधातुर्बोधिसत्त्वइति। नगन्धधातुर्बोधिसत्त्वइति। नाऽन्यत्र गन्धधातोर्बोधिसत्त्वइति। न गन्धधातौ बोधिसत्त्वइति। न बोधिसत्त्वे गन्धधातुरिति। नाऽगन्धधातुर्बोधिसत्त्वइति। न घ्राणविज्ञानधातुर्बोधिसत्त्वइति। नाऽन्यत्र घ्राणविज्ञानधातोर्बोधिसत्त्वइति। न घ्राणविज्ञानधातौ बोधिसत्त्वइति। न बोधिसत्त्वे घ्राणविज्ञानधातुरिति। नाऽघ्राणविज्ञानधातुर्बोधिसत्त्वइति। न जिह्वाधातुर्बोधिसत्त्वइति। नाऽन्यत्र जिह्वाधातोर्बोधिसत्त्वइति। न जिह्वाधातौ बोधिसत्त्वइति। न बोधिसत्त्वे जिह्वाधातुरिति। नाऽजिह्वाधातुर्बोधिसत्त्वइति। न रसधातुर्बोधिसत्त्वइति। नाऽन्यत्र रसधातोर्बोधिसत्त्वइति। नरसधातौबोधिसत्त्वइति। नबोधिसत्त्वेरसधातुरिति। नाऽरसधातुर्ब्बोधिसत्त्वइति। न जिह्वाविज्ञानधातुर्ब्बोधिसत्त्वइति। नाऽन्यत्र जिह्वाविज्ञानधातोर्ब्बोधिसत्त्वइति। न जिह्वाविज्ञानधातौ-बोधिसत्त्वइति। न बोधिसत्त्वे जिह्वाविज्ञानधातुरिति। नाऽजिह्वाविज्ञानधातुर्ब्बोधिसत्त्वइति। न कायधातुर्ब्बोधिसत्त्वइति। नाऽन्यत्र कायधातोर्ब्बोधिसत्त्वइति। न कायधातौ बोधिसत्त्वइति। न बोधिसत्त्वे कायधातुरिति। नाऽकायधातुर्ब्बोधिसत्त्वइति। न स्प्रष्टव्यधातु-

र्ब्बोधिसत्त्वइति। नाऽन्यत्र स्प्रष्टव्यधातोर्ब्बोधिसत्त्वइति। न स्प्रष्टव्यधातौ बोधिसत्त्वइति। न बोधिसत्त्वे स्प्रष्टव्यधातुरिति। नाऽस्प्रष्टव्यधातु र्ब्बोधिसत्त्वइति। न कायविज्ञानधातुर्ब्बोधिसत्त्वइति। नाऽन्यत्र कायविज्ञानधातोर्ब्बोधिसत्त्वइति। न कायविज्ञानधातौ बोधिसत्त्वइति। न बोधिसत्त्वे कायविज्ञानधातुरिति। नाऽकायविज्ञानधातुर्ब्बोधिसत्त्वइति। न मनोधातुर्ब्बोधिसत्त्वइति। नाऽन्यत्रमनोधातोर्ब्बोधिसत्त्वइति। न मनोधातौ बोधिसत्त्वइति। न बोधिसत्त्वे मनोधातुरिति। नाऽमनोधातुर्ब्बोधिसत्त्वइति। न धर्म्मधातुर्ब्बोधिसत्त्वइति। नाऽन्यत्र धर्मधातोर्ब्बोधिसत्त्वइति। न धर्मधातौ बोधिसत्त्वइति। न बोधिसत्त्वे धर्मधातुरिति। नाऽधर्मधातुर्ब्बोधिसत्त्वइति। न मनोविज्ञानधातुर्ब्बोधिसत्त्वइति। नाऽन्यत्र मनोविज्ञानधातोर्ब्बोधिसत्त्वइति। न मनोविज्ञानधातौ बोधिसत्त्वइति। नाऽमनोविज्ञानधातुर्बोधिसत्त्वइति।

न पृथिवीधातुर्बोधिसत्त्वेइति। नाऽन्यत्र पृथिवीधातोर्बोधिसत्त्वइति। न पृथिवीधातौ बोधिसत्त्वइति। न बोधिसत्त्वे पृथिवीधातुरिति। नाऽपृथिवीधातुर्बोधिसत्त्वइति। नाऽब्धातुर्बोधिसत्त्वइति। नाऽन्यत्राऽब्धातोर्बोधिसत्त्वइति। नाऽब्धातौ बोधिसत्त्वइति। न बोधिसत्त्वेऽब्धातुरिति। नाऽनब्धातुर्बोधिसत्त्वइति। न तेजोधातुर्बोधिसत्त्वइति। नाऽन्यत्र तेजोधातोर्बोधिसत्त्वइति। न तेजोधातौ बोधिसत्त्वइति। न बोधिसत्त्वेतेजोधातुरिति। नाऽतेजोधातुर्बोधिसत्त्वइति। न वायुधातुर्बोधिसत्त्वइति। नाऽन्यत्र वायुधातोर्बोधिसत्त्वइति। न वायु धातौ बोधिसत्त्वइति। न बोधिसत्त्वे वायुधातु-

रिति। नाऽवायुधातुर्बोधिसत्त्वइति। नाऽऽकाशधातुर्बोधिसत्त्वइति। नाऽन्यत्राऽऽकाशधातोर्बोधिसत्त्वइति। नाऽऽकाशधातौ बोधिसत्त्वइति। नबोधिसत्त्वे आकाशधातुरिति। नाऽनाऽऽकाशधातुर्बोधिसत्त्वइति।

न विज्ञानधातुर्बोधिसत्त्वइति। नाऽन्यत्र विज्ञानधातोर्बोधिसत्त्वइति। न विज्ञानधातौ बोधिसत्त्वइति। न बोधिसत्त्वे विज्ञानधातुरिति। नाऽविज्ञानधातुर्बोधिसत्त्वइति। नाऽविद्याबोधिसत्त्वइति। नाऽन्यत्राऽविद्याया बोधिसत्त्वइति। नाऽविद्यायां बोधिसत्त्वइति। न बोधिसत्त्वेऽविद्येति। नाऽनविद्योबोधिसत्त्वइति। न संस्काराबोधिसत्त्वइति। नाऽन्यत्र संस्कारेभ्यो बोधिसत्त्वइति। न संस्कारेषु बोधिसत्त्वइति। न बोधिसत्त्वेसंस्कारादइति। नाऽसंस्कारोबोधिसत्त्वइति। न विज्ञानं बोधिसत्त्वइति। नाऽन्यत्रविज्ञानाद्बोधिसत्त्वइति। न विज्ञाने बोधिसत्त्वइति। न बोधिसत्त्वेविज्ञानमिति। नाऽविज्ञानो बोधिसत्त्वइति। न नामरूपं बोधिसत्त्वइति। नाऽन्यत्र नामरूपाद्बोधिसत्त्वइति। न नामरूपे बोधिसत्त्वइति। न बोधिसत्त्वे नामरूपमिति। नाऽनामरूपोबोधिसत्त्वइति। न षडायतनं बोधिसत्त्वइति। नाऽन्यत्र षड़ायतनाद्बोधिसत्त्वइति। न षड़ायतनेबोधिसत्त्वइति। न बोधिसत्त्वे षड़ायतनमिति। नाऽषड़ायतनो बोधिसत्त्वइति। न स्पर्शोबोधिसत्त्वइति। नाऽन्यत्र स्पर्शाद्बोधिसत्त्वइति। न स्पर्शे बोधिसत्त्वइति। न बोधिसत्त्वे स्पर्शइति। नाऽस्पर्शोबोधिसत्त्वइति। न वेदनाबोधिसत्त्वइति। नाऽन्यत्र वेदनाया बोधिसत्त्वइति। न वेदनायां बोधिसत्त्वइति। न बोधिसत्त्वेवेदनेति। नाऽवेदनोबोधिसत्त्वइति। न तृष्णाबोधिसत्त्वइति। नाऽन्यत्र तृष्णाया बोधिसत्त्वइति।

न तृष्णायां बोधिसत्त्वइति। न बोधिसत्त्वे तृष्णेति। नाऽतृष्णोबोधि सत्त्वइति। नोपादानं बोधिसत्त्वइति। नाऽन्यत्रोपादानाद्बोधिसत्त्व इति। नोपादाने बोधिसत्त्वइति। न बोधिसत्त्वे उपादानमिति। नाऽनुपादानो बोधिसत्त्वइति। न भवोबोधिसत्त्वइति। नाऽन्यत्र-भवाद्बोधिसत्त्वइति। न भवे बोधिसत्त्वइति। न बोधिसत्त्वे भव-इति। नाऽभवोबोधिसत्त्वइति। न जातिर्बोधिसत्त्वइति। नाऽन्यत्र जातेर्बोधिसत्त्वइति। न जातौ बोधिसत्त्वइति। न बोधिसत्त्वे-जातिरिति। नाऽजातिर्बोधिसत्त्वइति। न जरामरणं बोधिसत्त्व-इति। नाऽन्यत्र जरामरणाद्बोधिसत्त्वइति। न जरामरणे बोधि-सत्त्वइति। न बोधिसत्त्वे जरामरणमिति। नाऽजरामरणोबोधि-सत्त्वइति। न रूपतथता बोधिसत्त्वइति। नाऽन्यत्र रूपतथताया-बोधिसत्त्वइति। न रूपतथतायां बोधिसत्त्वइति। न बोधि-सत्त्वेरूपतथतेति। नाऽरूपतथतोबोधिसत्त्वइति। न वेदनातथता बोधिसत्त्वइति। नाऽन्यत्र वेदनातथताया बोधिसत्त्वइति। न वेदनातथतायां बोधिसत्त्वइति। न बोधिसत्त्वे वेदनातथतेति। नाऽवेदनातथतोबोधिसत्त्वइति। न संज्ञातथता बोधिसत्त्वइति। नाऽन्यत्र संज्ञातथतायाः बोधिसत्त्वइति। न संज्ञातथतायां बोधि-सत्त्वइति। न बोधिसत्त्वे संज्ञातथतेति। नाऽसंज्ञातथतोबोधि-सत्त्वइति। न संस्कारतथता बोधिसत्त्वइति। नाऽन्यत्र संस्कार-तथतायाबोधिसत्त्वइति। न संस्कारतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे संस्कारतथतेति। नाऽसंस्कारतथतोबोधिसत्त्वइति। न विज्ञानतथताबोधिसत्त्वइति। नाऽन्यत्र विज्ञानतथतायाबोधि-

सत्त्वइति। न विज्ञानतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे विज्ञानतथतेति। नाऽविज्ञानतथतोबोधिसत्त्वइति।

न चक्षुस्तथता बोधिसत्त्वइति। नाऽन्यत्र चक्षुस्तथतायाबोधिसत्त्वइति। न चक्षुस्तथतायां बोधिसत्त्वइति। न बोधिसत्त्वे चक्षुस्तथतेति। नाऽचक्षुस्तथतोबोधिसत्त्वइति। न श्रोत्रतथता बोधिसत्त्वइति। नाऽन्यत्र श्रोत्रतथतायाबोधिसत्त्वइति। न श्रोत्रतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे श्रोत्रतथतेति। नाऽश्रोत्रतथतो बोधिसत्त्वइति। न घ्राणतथता बोधिसत्त्वइति। नाऽन्यत्रघ्राणतथताया बोधिसत्त्वइति। न घ्राणतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे घ्राणतथतेति। नाऽघ्राणतथतोबोधिसत्त्वइति। न जिह्वातथता बोधिसत्त्वइति। नाऽन्यत्र जिह्वातथताया बोधिसत्त्वइति। न जिह्वातथतायां बोधिसत्त्वइति। न बोधिसत्त्वे जिह्वातथतेति। नाऽजिह्वातथतोबोधिसत्त्वइति। न कायतथता बोधिसत्त्वइति। नाऽन्यत्र कायतथताया बोधिसत्त्वइति। न कायतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे कायतथतेति। नाऽकायतथतोबोधिसत्त्वइति। न मनस्तथता बोधिसत्त्वइति। नाऽन्यत्र मनस्तथताया बोधिसत्त्वइति। नमनस्तथतायां बोधिसत्त्वइति। न बोधिसत्त्वे मनस्तथतेति। नाऽमनस्तथतोबोधिसत्त्वइति।

न रूपतथता बोधिसत्त्वइति। नाऽन्यत्र रूपतथताया बोधिसत्त्वइति। न रूपतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे रूपतथतेति। नाऽरूपतथतोबोधिसत्त्वइति। न शब्दतथता बोधिसत्त्वइति। नाऽन्यत्र शब्दतथतायाबोधिसत्त्वइति। न शब्दतथ-

तायां बोधिसत्त्वइति। न बोधिसत्त्वे शब्दतथतेति। नाऽशब्दतथतोबोधिसत्त्वइति। न गन्धतथता बोधिसत्त्वइति। नाऽन्यत्र गन्धतथतायाबोधिसत्त्वइति। न गन्धतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे गन्धतथतेति। नाऽगन्धतथतोबोधिसत्त्वइति। न रसतथता बोधिसत्त्वइति। नाऽन्यत्र रसतथतायाबोधिसत्त्वइति। न रसतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे रसतथतेति। नाऽरसतथतोबोधिसत्त्वइति। न स्पर्शतथता बोधिसत्त्वइति। नाऽन्यत्र स्पर्शतथताया बोधिसत्त्वइति। न स्पर्शतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे स्पर्शतथतेति। नाऽस्पर्शतथतोबोधिसत्त्वइति। न धर्मतथता बोधिसत्त्वइति। नाऽन्यत्र धर्मतथताया बोधिसत्त्वइति। न धर्मतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे धर्मतथतेति। नाऽधर्मतथतोबोधिसत्त्वइति।

न चक्षुर्धातुतथता बोधिसत्त्वइति। नाऽन्यत्र चक्षुर्धातुतथतायाबोधिसत्त्वइति। न चक्षुर्धातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे चक्षुर्धातुतथतेति। नाऽचक्षुर्धातुतथतोबोधिसत्त्वइति। न रूपधातुतथता बोधिसत्त्वइति। नाऽन्यत्र रूपधातुतथतायाबोधिसत्त्वइति। न रूपधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे रूपधातुतथतेति। नाऽरूपधातुतथतोबोधिसत्त्वइति।

न चक्षुर्विज्ञानधातुतथता बोधिसत्त्वइति। नाऽन्यत्र चक्षुर्विज्ञानधातुतथतायाबोधिसत्त्वइति। न चक्षुर्विज्ञानधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे चक्षुर्विज्ञानधातुतथतेति। नाऽचक्षुर्विज्ञानधातुतथतोबोधिसत्त्वइति। न श्रोत्रधातुतथता बोधिसत्त्व-

इति। नाऽन्यत्र श्रोत्रधातुतथतायाबोधिसत्त्वइति। न श्रोत्रधातु-तथतायां बोधिसत्त्वइति। न बोधिसत्त्वे श्रोत्रधातुतथतेति। नाऽश्रोत्रधातुतथतो बोधिसत्त्वइति। न शब्दधातुतथता बोधिसत्त्वइति। नाऽन्यत्र शब्दधातुतथतायाबोधिसत्त्वइति। न शब्द-धातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे शब्दधातुतथतेति। नाऽशब्दधातुतथतोबोधिसत्त्वइति। न श्रोत्रविज्ञानधातुतथता बोधिसत्त्वइति। नाऽन्यत्र श्रोत्रविज्ञानधातुतथतायाबोधिसत्त्वइति। न श्रोत्रविज्ञानधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे श्रोत्र-विज्ञानधातुतथतेति। नाऽश्रोत्रविज्ञानधातुतथतो बोधिसत्त्वइति। न घ्राणधातुतथता बोधिसत्त्वइति। नाऽन्यत्रघ्राणधातुतथताया बोधिसत्त्वइति। न घ्राणधातुतथतायां बोधिसत्त्वइति। न बोधि-सत्त्वे घ्राणधातुतथतेति। नाऽघ्राणधातुतथतोबोधिसत्त्वइति। न गन्धधातुतथता बोधिसत्त्वइति। नाऽन्यत्रगन्धधातुतथतायाबोधि-सत्त्वइति। न गन्धधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे गन्धधातुतथतेति। नाऽगन्धधातुतथतोबोधिसत्त्वइति।

न घ्राणविज्ञानधातुतथता बोधिसत्त्वइति। नाऽन्यत्र घ्राण-विज्ञानधातुतथतायाबोधिसत्त्वइति। न घ्राणविज्ञानधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे घ्राणविज्ञानधातुतथतेति। नाऽघ्राण-विज्ञानधातुतथतोबोधिसत्त्वइति।

न जिह्वाधातुतथता बोधिसत्त्वइति। नाऽन्यत्रजिह्वाधातुतथ-तायाबोधिसत्त्वइति। न जिह्वाधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे जिह्वाधातुतथतेति। नाऽजिह्वाधातुतथतोबोधिसत्त्वइति।

न रसधातुतथता बोधिसत्त्वइति। नाऽन्यत्र रसधातुतथताया-बोधिसत्त्वइति। न रसधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे रसधातुतथतेति। नाऽरसधातुतथतोबोधिसत्त्वइति।

न जिह्वाविज्ञानधातुतथता बोधिसत्त्वइति। नाऽन्यत्र जिह्वाविज्ञानधातुतथताया बोधिसत्त्वइति। न जिह्वाविज्ञानधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे जिह्वाविज्ञानधातुतथतेति। नाऽजिह्वाविज्ञानधातुतथतोबोधिसत्त्वइति।

न कायधातुतथता बोधिसत्त्वइति। नाऽन्यत्रकायधातुतथताया-बोधिसत्त्वइति। न कायधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे कायधातुतथेति। नाऽकायधातुतथतोबोधिसत्त्वइति।

न स्प्रष्टव्यधातुतथता बोधिसत्त्वइति। नाऽन्यत्र स्प्रष्टव्यधातुतथताया बोधिसत्त्वइति। न स्प्रष्टव्यधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे स्प्रष्टव्यधातुतथतेति। नाऽस्प्रष्टव्यधातुतथतोबोधिसत्त्वइति।

न कायविज्ञानधातुतथता बोधिसत्त्वइति। नाऽन्यत्र कायविज्ञानधातुतथतायाबोधिसत्तइति। न कायविज्ञानधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे कायविज्ञातधातुतथतेति। नाऽकायविज्ञानधातुतथतोबोधिसत्त्वइति।

न मनोधातुतथता बोधिसत्त्वइति। नाऽन्यत्र मनोधातुतथताया-बोधिसत्त्वइति। न मनोधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे मनोधातुतथतेति। नाऽमनोधातुतथतोबोधिसत्त्वइति।

न धर्म्मधातुतथता बोधिसत्त्वइति। नाऽन्यत्र धर्म्मधातुतथताया-

बोधिसत्त्वइति। न धर्म्मधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे धर्म्मधातुतथतेति। नाऽधर्म्मधातुतथतोबोधिसत्त्वइति।

न मनोविज्ञानधातुतथता बोधिसत्त्वइति। नाऽन्यत्र मनोविज्ञानधातुतथतायाबोधिसत्त्वइति। न मनोविज्ञानधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे मनोविज्ञानधातुतथतेति। नाऽमनोविज्ञानधातुतथतोबोधिसत्त्वइति।

न पृथिवीधातुतथता बोधिसत्त्वइति। नाऽन्यत्र पृथिवीधातुतथतायाबोधिसत्त्वइति। न पृथिवीधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे पृथिवीधातुतथतेति। नाऽपृथिवीधातुतथतोबोधिसत्त्वइति।

नाऽब्धातुतथता बोधिसत्त्वइति। नाऽन्यत्राऽब्धातुतथतायाबोधिसत्त्वइति। नाऽब्धातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वेऽब्धातुतथतेति। नाऽनब्धातुतथतोबोधिसत्त्वइति।

न तेजोधातुतथता बोधिसत्त्वइति। नाऽन्यत्र तेजोधातुतथताया बोधिसत्त्वइति। न तेजोधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे तेजोधातुतथतेति। नाऽतेजोधातुतथतोबोधिसत्त्वइति।

न वायुधातुतथता बोधिसत्त्वइति। नाऽन्यत्र वायुधातुतथतायाबोधिसत्त्वइति। न वायुधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे वायुधातुतथतेति। नाऽवायुधातुतथतोबोधिसत्त्वइति।

नाऽऽकाशधातुतथता बोधिसत्त्वइति। नाऽन्यत्राऽऽकाशधातुतथतायाबोधिसत्त्वइति। नाऽऽकाशधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे आकाशधातुतथतेति। नाऽनाऽऽकाशधातुतथतोबोधिसत्त्वइति।

न विज्ञानधातुतथता बोधिसत्त्वइति। नाऽन्यत्र विज्ञानधातुतथतायाबोधिसत्त्वइति। न विज्ञानधातुतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे विज्ञानधातुतथेति। नाऽविज्ञानधातुतथतोबोधिसत्त्वइति।

नाऽविद्यातथता बोधिसत्त्वइति। नान्यत्राऽविद्यातथतायाबोधिसत्त्वइति। नाऽविद्यातथातायां बोधिसत्त्वइति। न बोधिसत्त्वेऽविद्यातथतेति। नाऽविद्यातथतोबोधिसत्त्वइति

न संस्कारतथता बोधिसत्त्वइति। नाऽन्यत्र संस्कारतथतायाबोधिसत्त्वइति। न संस्कारतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे संस्कारतथतेति। नाऽसंस्कारतथतोबोधिसत्त्वइति।

न विज्ञानतथता बोधिसत्त्वइति। नाऽन्यत्र विज्ञानतथतायाबोधिसत्त्वइति। न विज्ञानतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे विज्ञानतथतेति। नाऽविज्ञानतथतोबोधिसत्त्वइति।

न नामरूपतथता बोधिसत्त्वइति। नाऽन्यत्र नामरूपतथतायाबोधिसत्त्वइति। न नामरूपतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे नामरूपतथतेति। नाऽनामरूतथतो बोधिसत्त्वइति।

न षड़ायतनतथता बोधिसत्त्वइति। नाऽन्यत्र षड़ायतनतथतायाबोधिसत्त्वइति। न षड़ायतनतथातायां बोधिसत्त्वइति। न बोधिसत्त्वे षड़ायतनतथतेति। नाऽषड़ायतनतथतो बोधिसत्त्वइति।

न स्पर्शतथता बोधिसत्त्वइति। नाऽन्यत्र स्पर्शतथतायाबोधिसत्त्वइति। न स्पर्शतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे स्पर्शतथतेति। नाऽस्पर्शतथतोबोधिसत्त्वइति।

न वेदनातथता बोधिसत्त्वइति। नाऽन्यत्र वेदनातथताया-बोधिसत्त्वइति। न वेदनातथतायां बोधिसत्त्वइति। न बोधिसत्त्वे वेदनातथतेति। नाऽवेदनातथतोबोधिसत्त्वइति।

न तृष्णातथता बोधिसत्त्वइति। नाऽन्यत्र तृष्णातथतायाबोधि-सत्त्वइति। न तृष्णातथतायां बोधिसत्त्वइति। न बोधिसत्त्वे तृष्णा-तथतेति। नाऽतृष्णातथतो बोधिसत्त्वइति।

नोपादानतथता बोधिसत्त्वइति। नाऽन्यत्रोपादानतथताया-बोधिसत्त्वइति। नोपादानतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे उपादानतथतेति। नाऽनुपादानतथतोबोधिसत्त्वइति।

न भवतथता बोधिसत्त्वइति। नाऽन्यत्र भवतथतायाबोधिसत्त्व-इति। न भवतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे भवतथतेति। नाऽभवतथतोबोधिसत्त्वइति।

न जातितथता बोधिसत्त्वइति। नाऽन्यत्र जातितथतायाबोधि-सत्त्वइति। न जातितथतायां बोधिसत्त्वइति। न बोधिसत्त्वे जाति-तथतेति। नाऽजातितथतोबोधिसत्त्वइति।

न जरामरणतथता बोधिसत्त्वइति। नाऽन्यत्र जरामरणतथ-तायाबोधिसत्त्वइति। न जरामरणतथतायां बोधिसत्त्वइति। न बोधिसत्त्वे जरामरणतथतेति। नाऽजरामरणतथतोबोधिसत्त्वइति।

सुभूतिराह। *अत्यन्ततया भगवन् बोधिसत्त्वोन संविद्यते

---

* सुभूतिर्ब्बोधिसत्त्वस्याऽसत्पदार्थत्वादेव न रूपादिस्वरूपत्व तदन्यत्वादिकं न वस्तु स्वभावकृतमित्युत्तरवाक्येन दर्शयति अत्यन्ततयेत्यादिना। अत्यन्ततया बोधिसत्त्वस्य विद्यमानत्वाभावः उपलब्धेरभावश्च देशतः कालतश्च सत्ता-

नोपलभ्यते। तत् कुतोरूपाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र रूपाद्बोधिसत्त्वोभविष्यति। कुतोरूपे बोधिसत्त्वोभविष्यति। कुतो बोधिसत्त्वे रूपं भविष्यति। कुतोऽरूपोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वोन संविद्यते नोपलभ्यते। तत् कुतोवेदनाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र वेदनाया बोधिसत्त्वो भविष्यति। कुतो वेदनायां बोधिसत्त्वोभविष्यति। कुतो बोधिसत्त्वे वेदना भविष्यति। कुतोऽवेदनोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वोन संविद्यते नोपलभ्यते। तत् कुतः संज्ञाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र संज्ञाया-बोधिसत्त्वोभविष्यति। कुतः संज्ञायां बोधिसत्त्वोभविष्यति। कुतो बोधिसत्त्वे संज्ञा भविष्यति। कुतोऽसंज्ञोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वोन संविद्यते नोपलभ्यते। तत् कुतः संस्काराऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र संस्कारेभ्यो बोधिसत्त्वोभविष्यति। कुतः संस्कारेषु बोधिसत्त्वोभविष्यति। कुतो बोधिसत्त्वे संस्कारा भविष्यन्ति। कुतोऽसंस्कारोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोविज्ञानाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र विज्ञाना-द्बोधिसत्त्वोभविष्यति। कुतोविज्ञाने बोधिसत्त्वोभविष्यति। कुतो-बोधिसत्त्वे विज्ञानं भविष्यति। कुतोऽविज्ञानोबोधिसत्त्वोभविष्यति।

ऽभावः उपलब्ध्यभावश्च न हि कस्मिंश्चिद्देशे कस्मिंश्चित्काले वा बोधिसत्त्वस्य विद्यमानता उपलब्धिर्वा परमार्थतः सम्भवति अलीकत्वात् तथाच नाऽर्थवशं सम्पश्यत्वेवं वदामीति सुभूतेराशयः रूपाऽधिवचनं रूपस्य वाचकं बोधिसत्त्वः बोधिसत्त्वपदमिति तदर्थः। एवं परत्र।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतश्चक्षुरधिवचनं बोधिसत्त्वो भविष्यति। कुतोऽन्यत्र चक्षुषो बोधिसत्त्वो भविष्यति। कुतश्चक्षुषि बोधिसत्त्वो भविष्यति। कुतो बोधिसत्त्वे चक्षुर्भविष्यति। कुतोऽचक्षुष्को बोधिसत्त्वो भविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः श्रोत्राऽधिवचनं बोधिसत्त्वो भविष्यति। कुतोऽन्यत्र श्रोत्राद्बोधिसत्त्वो भविष्यति। कुतः श्रोत्रे बोधिसत्त्वो भविष्यति। कुतो बोधिसत्त्वे श्रोत्रं भविष्यति। कुतोऽश्रोत्रो बोधिसत्त्वो भविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतो घ्राणाऽधिवचनं बोधिसत्त्वो भविष्यति। कुतोऽन्यत्र घ्राणाद्बोधिसत्त्वो भविष्यति। कुतो घ्राणे बोधिसत्त्वो भविष्यति। कुतो बोधिसत्त्वे घ्राणं भविष्यति। कुतोऽघ्राणो बोधिसत्त्वो भविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतो जिह्वाऽधिवचनं बोधिसत्त्वो भविष्यति। कुतोऽन्यत्र जिह्वाया बोधिसत्त्वो भविष्यति। कुतो जिह्वायां बोधिसत्त्वो भविष्यति। कुतो बोधिसत्त्वे जिह्वा भविष्यति। कुतोऽजिह्वो बोधिसत्त्वो भविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः कायाऽधिवचनं बोधिसत्त्वो भविष्यति। कुतोऽन्यत्र कायाद्बोधिसत्त्वो भविष्यति। कुतः काये बोधिसत्त्वो भविष्यति। कुतो बोधिसत्त्वे कायो भविष्यति। कुतोऽकायो बोधिसत्त्वो भविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतो मनोऽधिवचनं बोधिसत्त्वो भविष्यति। कुतोऽन्यत्र मनसो बोधि-

सत्त्वोभविष्यति। कुतोमनसि बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे मनोभविष्यति। कुतोऽमनस्कोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वोन संविद्यते नोपलभ्यते। तत् कुतोरूपाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र रूपाद्बोधिसत्त्वोभविष्यति। कुतोरूपे बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे रूपं भविष्यति। कुतोऽरूपोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वोन संविद्यते नोपलभ्यते। तत् कुतः शब्दाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र शब्दाद्बोधिसत्त्वोभविष्यति। कुतः शब्दे बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे शब्दोभविष्यति। कुतोऽशब्दोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वोन संविद्यते नोपलभ्यते। तत् कुतोगन्धाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र गन्धाद्बोधिसत्त्वोभविष्यति। कुतोगन्धे बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे गन्धोभविष्यति। कुतोऽगन्धोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वोन संविद्यते नोपलभ्यते। तत् कुतोरसाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र रसाद्बोधिसत्त्वोभविष्यति। कुतोरसे बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे रसोभविष्यति। कुतोऽरसोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वोन संविद्यते नोपलभ्यते। तत् कुतः स्पर्शाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र स्पर्शाद्बोधिसत्त्वोभविष्यति। कुतः स्पर्शे बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे स्पर्शोभविष्यति। कुतोऽस्पर्शोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वोन संविद्यते नोपलभ्यते। तत् कुतोधर्म्माऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र धर्म्माद्बोधिसत्त्वोभविष्यति। कुतोधर्म्मे बोधिसत्त्वोभविष्यति। कुतो बोधिसत्त्वे धर्म्मोभविष्यति। कुतोऽधर्म्मोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वोन संविद्यते नोपलभ्यते। तत् कुतश्चक्षुर्धात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र चक्षुर्धातोर्ब्बोधिसत्त्वोभविष्यति। कुतोश्चक्षुर्धातौ बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे चक्षुधातुर्भविष्यति। कुतोऽचक्षुर्धातुर्ब्बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोरूपधात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र रूपधातोर्ब्बोधिसत्त्वोभविष्यति। कुतोरूपधातौ बोधिसत्त्वोभविष्यति। कुतो बोधिसत्त्वे रूपधातुर्भविष्यति। कुतोऽरूपधातुर्ब्बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतश्चक्षुर्व्विज्ञानधात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र चक्षुर्व्विज्ञानधातोर्ब्बोधिसत्त्वोभविष्यति। कुतश्चक्षुर्व्विज्ञानधातौ बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे चक्षुर्व्विज्ञानधातुर्भविष्यति। कुतोऽचक्षुर्व्विज्ञानधातुर्ब्बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः श्रोत्रधात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र श्रोत्र-धातोर्ब्बोधिसत्त्वोभविष्यति। कुतः श्रोत्रधातौ बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे श्रोत्रधातुर्भविष्यति। कुतोऽश्रोत्रधातुर्ब्बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत्

कुतः शब्दधात्वधिवचनं बोधिसत्त्वोभविष्यति । कुतोऽन्यत्र शब्द-धातोर्ब्बोधिसत्त्वोभविष्यति । कुतः शब्दधातौ बोधिसत्त्वोभविष्यति । कुतोबोधिसत्त्वे शब्दधातुर्भविष्यति । कुतोऽशब्दधातुर्ब्बोधिसत्त्वो-भविष्यति ।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते । तत् कुतः श्रोत्रविज्ञानधात्वधिवचनं बोधिसत्त्वोभविष्यति । कुतोऽन्यत्र श्रोत्रविज्ञानधातोर्ब्बोधिसत्त्वोभविष्यति । कुतः श्रोत्रविज्ञानधातौ बोधिसत्त्वोभविष्यति । कुतोबोधिसत्त्वे श्रोत्रविज्ञानधातुर्भविष्यति । कुतोऽश्रोत्रविज्ञानधातुर्ब्बोधिसत्त्वोभविष्यति ।

अत्यन्ततया भगवन् बोधिसत्वो न संविद्यते नोपलभ्यते । तत् कुतोघ्राणधात्वधिवचनं बोधिसत्त्वोभविष्यति । कुतोऽन्यत्र घ्राणधातो-र्ब्बोधिसत्त्वोभविष्यति । कुतोघ्राणधातौ बोधिसत्त्वोभविष्यति । कुतो-बोधिसत्त्वे घ्राणधातुर्भविष्यति । कुतोऽघ्राणधातुर्ब्बोधिसत्त्वोभविष्यति ।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते । तत् कुतोगन्धधात्वधिवचनं बोधिसत्त्वोभविष्यति । कुतोऽन्यत्र गन्धधातो-र्ब्बोधिसत्त्वोभविष्यति । कुतोगन्धधातौ बोधिसत्त्वोभविष्यति । कुतो-बोधिसत्त्वे गन्धधातुर्भविष्यति । कुतोऽगन्धधातुर्ब्बोधिसत्त्वोभविष्यति ।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते । तत् कुतोघ्राणविज्ञानधात्वधिवचनं बोधिसत्त्वोभविष्यति । कुतोऽन्यत्र घ्राणविज्ञानधातोर्ब्बोधिसत्त्वोभविष्यति । कुतोघ्राणविज्ञानधातौ बोधिसत्त्वोभविष्यति । कुतोबोधिसत्त्वे घ्राणविज्ञानधातुर्भविष्यति । कुतोऽघ्राणविज्ञानधातुर्ब्बोधिसत्त्वोभविष्यति ।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोजिह्वाधात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र जिह्वाधातोर्ब्बोधिसत्त्वोभविष्यति। कुतोजिह्वाधातौ बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे जिह्वाधातुर्भविष्यति। कुतोऽजिह्वाधातुर्ब्बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोरसधात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र रसधातोर्ब्बोधिसत्त्वोभविष्यति। कुतोरसधातौ बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे रसधातुर्भविष्यति। कुतोऽरसधातुर्ब्बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोजिह्वाविज्ञानधात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र जिह्वाविज्ञानधातोर्ब्बोधिसत्त्वोभविष्यति। कुतोजिह्वाविज्ञानधातौ बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे जिह्वाविज्ञानधातुर्भविष्यति। कुतोऽजिह्वाविज्ञानधातुर्ब्बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः कायधात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र कायधातोर्ब्बोधिसत्त्वोभविष्यति। कुतः कायधातौ बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे कायधातुर्भविष्यति। कुतोऽकायधातुर्ब्बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः स्प्रष्टव्यधात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र स्प्रष्टव्यधातोर्ब्बोधिसत्त्वोभविष्यति। कुतः स्प्रष्टव्यधातौ बोधिसत्त्वोभविष्यति।

कुतोबोधिसत्त्वे स्पृष्टव्यधातुर्भविष्यति । कुतोऽस्पृष्टव्यधातुर्ब्बोधिसत्त्वो-भविष्यति ।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते । तत् कुतः कायविज्ञानधात्वधिवचनं बोधिसत्त्वोभविष्यति । कुतोऽन्यत्र कायविज्ञानधातोर्ब्बोधिसत्त्वोभविष्यति । कुतः कायविज्ञानधातौ बोधिसत्त्वोभविष्यति । कुतो बोधिसत्त्वे कायविज्ञानधातुर्भविष्यति । कुतोऽकायविज्ञानधातुर्भविष्यति ।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते । कुतोमनोधात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र मनोधातो-र्ब्बोधिसत्त्वोभविष्यति। कुतोमनोधातौ बोधिसत्त्वोभविष्यति। कुतोबो-धिसत्त्वे मनोधातुर्भविष्यति । कुतोऽमनोधातुर्ब्बोधिसत्त्वोभविष्यति ।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते । तत् कुतोधर्म्मधात्वधिवचनं बोधिसत्त्वो भविष्यति। कुतोऽन्यत्र धर्म्मधातो-र्ब्बोधिसत्त्वोभविष्यति। कुतोधर्म्मधातौ बोधिसत्त्वोभविष्यति। कुतो-बोधिसत्त्वे धर्म्मधातुर्भविष्यति। कुतोऽधर्म्मधातुर्ब्बोधिसत्त्वोभविष्यति ।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते । तत् कुतोमनोविज्ञानधात्वधिवचनं बोधिसत्त्वोभविष्यति । कुतोऽन्यत्र मनोविज्ञानधातोर्ब्बोधिसत्त्वोभविष्यति । कुतोमनोविज्ञानधातौ बोधिसत्त्वोभविष्यति । कुतोबोधिसत्त्वे मनोविज्ञानधातुर्भविष्यति । कुतोऽमनोविज्ञानधातुर्ब्बोधिसत्त्वोभविष्यति ।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते । तत् कुतः पृथिवीधात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र पृथिवी-

धातोर्ब्बोधिसत्त्वोभविष्यति। कुतः पृथिवीधातौ बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे पृथिवीधातुर्भविष्यति। कुतोऽपृथिवीधातुर्भविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोऽब्धात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्राऽब्धातोर्ब्बोधिसत्त्वोभविष्यति। कुतोऽब्धातौ बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वेऽब्धातुर्भविष्यति। कुतोऽनब्धातुर्ब्बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतस्तेजोधात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र तेजोधातोर्ब्बोधिसत्त्वोभविष्यति। कुतस्तेजोधातौ बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे तेजोधातुर्भविष्यति। कुतोऽतेजोधातुर्ब्बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतो वायुधात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र वायुधातोर्बोधिसत्त्वोभविष्यति। कुतोवायुधातौ बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे वायुधातुर्भविष्यति। कुतोऽवायुधातुर्बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतश्चाकाशधात्वधिवचनं बोधिसत्त्वोभविष्यति। तत् कुतोऽन्यत्राकाशधातोर्बोधिसत्त्वोभविष्यति। कुतश्चाकाशधातौ बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे आकाशधातुर्भविष्यति। कुतोऽनाकाश धातुर्बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत्

कुतो विज्ञानधात्वधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र विज्ञान धातोर्बोधिसत्त्वोभविष्यति। कुतो विज्ञान धातौ बोधिसत्त्वो-भविष्यति। कुतोबोधिसत्त्वे विज्ञानधातुर्भविष्यति। कुतोऽविज्ञान-धातुर्बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोऽविद्याऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्राऽविद्याया-बोधिसत्त्वोभविष्यति। कुतोऽविद्यायां बोधिसत्त्वोभविष्यति। कुतो बोधिसत्त्वेऽविद्याभविष्यति। कुतोऽनविद्योबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः संस्काराऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र संस्कारेभ्यो-बोधिसत्त्वोभविष्यति। कुतः संस्कारेषु बोधिसत्त्वोभविष्यति। कुतो बोधिसत्त्वे संस्कारो भविष्यति। कुतोऽसंस्कारोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोविज्ञानाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र विज्ञाना-द्बोधिसत्त्वोभविष्यति। कुतोविज्ञाने बोधिसत्त्वोभविष्यति। कुतो-बोधिसत्त्वे विज्ञानं भविष्यति। कुतोऽविज्ञानोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोनामरूपाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र नामरूपा-द्बोधिसत्त्वोभविष्यति। कुतोनामरूपे बोधिसत्त्वोभविष्यति। कुतो-बोधिसत्त्वे नामरूपं भविष्यति। कुतोऽनामरूपोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः षड़ायतनाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र षड़ाय-

तनाद्बोधिसत्त्वोभविष्यति। कुतः षड़ायतना बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे षड़ायतनं भविष्यति। कुतोऽषड़ायतनोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः स्पर्शाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र स्पर्शाद्बोधिसत्त्वोभविष्यति। कुतःस्पर्शे बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे स्पर्शोभविष्यति। कुतोऽस्पर्शोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते तत् कुतोवेदनाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्रवेदनाया-बोधिसत्त्वोभविष्यति। कुतो वेदनायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे वेदना भविष्यति। कुतोऽवेदनोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतस्तृष्णाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र तृष्णायाबोधिसत्त्वोभविष्यति। कुतस्तृष्णायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे तृष्णा भविष्यति। कुतोऽतृष्णोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतउपादानाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्रोपादाना-द्बोधिसत्त्वोभविष्यति। कुतउपादाने बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे उपादानं भविष्यति। कुतोऽनुपादानोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते तत् कुतोभवाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र भवाद्बोधिसत्त्वो-

भविष्यति। कुतोभवे बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे भवो-भविष्यति। कुतोऽभवो बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोजात्यधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र जातेर्बोधि-सत्त्वोभविष्यति। कुतोजातौ बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे जातिर्भविष्यति। कुतोऽजातिर्बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते। नोपलभ्यते तत् कुतोजरामरणाऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र जरा-मरणाद्बोधिसत्त्वोभविष्यति। कुतोजरामरणे बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे जरामरणं भविष्यति। कुतोऽजरामरणो बोधिसत्त्वो-भविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते। नोपलभ्यते तत् कुतोरूपतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र रूपतथ-तायाबोधिसत्त्वोभविष्यति। कुतोरूपतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वेरूपतथता भविष्यति। कुतोऽरूपतथतोबोधिसत्त्वो-भविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोवेदनातथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र वेदना-तथताया बोधिसत्त्वोभविष्यति। कुतो वेदनातथतायां बोधि-सत्त्वोभविष्यति। कुतोबोधिसत्त्वे वेदनातथताभविष्यति। कुतोऽवे-दनातथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत्

कुतः संज्ञातथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र संज्ञातथतायाबोधिसत्त्वोभविष्यति। कुतः संज्ञातथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे संज्ञातथता भविष्यति। कुतोऽसंज्ञातथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः संस्काराऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र संस्कारः तथतायाबोधिसत्त्वो भविष्यति। कुतः संस्कारतथतायां बोधिसत्त्वोभविष्यति। कुतः बोधिसत्त्वे संस्कारतथता भविष्यति। कुतोऽसंस्कारतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोविज्ञानतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र विज्ञानतथतायाबोधिसत्त्वोभविष्यति। कुतोविज्ञानतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे विज्ञानतथता भविष्यति। कुतोऽविज्ञानतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतश्चक्षुस्तथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र चक्षुस्तथतायाबोधिसत्त्वोभविष्यति। कुतश्चक्षुस्तथतायां बोधिसत्त्वोभविष्यति। कुतो बोधिसत्त्वेचक्षुस्तथता भविष्यति। कुतोऽचक्षुस्तथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः श्रोत्रतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र श्रोत्रतथतायाबोधिसत्त्वोभविष्यति। कुतः श्रोत्रतथतायां बोधिसत्त्वो-

भविष्यति। कुतोबोधिसत्त्वे श्रोत्रतथता भविष्यति। कुतोऽश्रोत्रतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोघ्राणतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र घ्राण तथतायाबोधिसत्त्वोभविष्यति। कुतोघ्राणतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे घ्राणतथता भविष्यति। कुतोऽघ्राणतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोजिह्वातथताऽधिवचनं बोधिसत्त्वो भविष्यति। कुतोऽन्यत्र जिह्वातथतायाबोधिसत्त्वोभविष्यति। कुतोजिह्वातथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे जिह्वातथता भविष्यति। कुतोऽजिह्वातथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया गववन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः कायतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र कायतथतायाबोधिसत्त्वोभविष्यति। कुतः कायतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे कायतथताभविष्यति। कोतोऽकायतथता बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न सविद्यते नोपलते। तत् कुतोमनस्तथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र मनस्तथतायाबोधिसत्त्वोभविष्यति। कुतोमनस्तथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वेमनस्तथता भविष्यति। कुतोऽमनस्तथतो बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतो रूपतथताऽधिवचनं बोधिसत्त्वो भविष्यति। कुतोऽन्यत्र रूपतथतायाबोधिसत्त्वोभविष्यति। कुतो रूपतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे रूपतथता भविष्यति। कुतोऽरूपतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः शब्दतथताऽधिवचनं बोधिसत्त्वो भविष्यति। कुतोऽन्यत्र शब्दतथतायाबोधिसत्त्वोभविष्यति। कुतः शब्दतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे शब्दतथता भविष्यति। कुतोऽशब्दतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोगन्धतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र गन्धतथतायाबोधिसत्त्वोभविष्यति। कुतोगन्धतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे गन्धतथता भविष्यति। कुतोऽगन्धतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोरसतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्ररसतथतायाबोधिसत्त्वोभविष्यति। कुतोरसतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे रसतथताभविष्यति। कुतोऽरसतथतो बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः स्पर्शतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र

स्पर्शतथतायाबोधिसत्त्वोभविष्यति। कुतः स्पर्शतथतायां बोधिसत्त्वो-भविष्यति। कुतोबोधिसत्त्वे स्पर्शतथता भविष्यति। कुतोऽस्पर्श-तथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोधर्म्मतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र धर्म्मतथ-तायाबोधिसत्त्वोभविष्यति। कुतोधर्म्मतथतायां बोधिसत्त्वोभविष्यति। कुतो बोधिसत्त्वे धर्म्मतथता भविष्यति। कुतोऽधर्म्मतथतोबोधि-सत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतश्चक्षुर्धातुतथताऽधिवचनं बोधिसत्त्वो भविष्यति। कुतोऽन्यत्र चक्षु-र्धातुतथतायाबोधिसत्त्वोभविष्यति। कुतोऽन्यत्र चक्षुर्धातुतथताया-बोधिसत्त्वोभविष्यति। कुतश्चक्षुर्धातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे चक्षुर्धातुतथता भविष्यति। कुतोऽचक्षुर्धातुतथतो-बोधिसत्त्वो भविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोरूपधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र रूप-धातुतथतायाबोधिसत्त्वोभविष्यति। कुतोरूपधातुतथतायां बोधि-सत्त्वोभविष्यति। कुतोबोधिसत्त्वे रूपधातुतथताभविष्यति। कुतो-ऽरूपधातुतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतश्चक्षुर्विज्ञानधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र चक्षुर्विज्ञानधातुतथतायाबोधिसत्त्वोभविष्यति। कुतश्चक्षुर्विज्ञानधातु-

तथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे चक्षुर्विज्ञानधातु-तथता भविष्यति। कुतोऽचक्षुर्विज्ञानधातुतथतो बोधिसत्त्वोभवि-ष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः श्रोत्रधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र श्रोत्रधातु तथतायाबोधिसत्त्वोभविष्यति। कुतः श्रोत्रधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे श्रोत्रधातुतथता भविष्यति। कुतोऽश्रोत्रधातुतथतो बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः शब्दधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र शब्दधातुतथतायाबोधिसत्त्वो भविष्यति। कुतः शब्दधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे शब्दधातुतथता भविष्यति। कुतोऽशब्दधातुतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः श्रोत्रविज्ञानधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतो-ऽन्यत्र श्रोत्रविज्ञानधातुतथतायाबोधिसत्त्वोभविष्यति। कुतः श्रोत्र विज्ञानधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे श्रोत्र-विज्ञानधातुतथता भविष्यति। कुतोऽश्रोत्रविज्ञानधातुतथतोबोधि-सत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोघ्राणधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्रघ्राण-धातुतथतायाबोधिसत्त्वोभविष्यति। कुतोघ्राणधातुतथतायां बोधि-

सत्त्वोभविष्यति। कुतोबोधिसत्त्वे घ्राणधातुतथता भविष्यति। कुतोऽघ्राणधातुतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोगन्धधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्रगन्धधातुतथतायाबोधिसत्त्वोभविष्यति। कुतोगन्धधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे गन्धधातुतथता भविष्यति। कुतोऽगन्धधातुतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतो घ्राणविज्ञानधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्रघ्राणविज्ञानधातुतथतायाबोधिसत्त्वोभविष्यति। कुतोघ्राणविज्ञानधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे घ्राणविज्ञानधातुतथता भविष्यति। कुतोऽघ्राणविज्ञानधातुतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोजिह्वाधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र जिह्वाधातुतथताया बोधिसत्त्वो भविष्यति। कुतोजिह्वाधातुतथतायां बोधिसत्त्वोभविष्यति। कुतो बोधिसत्त्वे जिह्वाधातुतथता भविष्यति। कुतोऽजिह्वाधातुतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोरसधातु तथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र रसधातुतथतायाबोधिसत्त्वोभविष्यति। कुतोरसधातुतथतायां बोधिसत्त्वो भविष्यति। कुतोबोधिसत्त्वे रसधातुतथता भविष्यति। कुतोऽरसधातुतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतो जिह्वाविज्ञानधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र जिह्वाविज्ञानधातुतथतायाबोधिसत्त्वोभविष्यति। कुतोजिह्वाविज्ञानधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे जिह्वाविज्ञानधातुतथता भविष्यति। कुतोऽजिह्वाविज्ञानधातुतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः कायधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र कायधातुतथतायाबोधिसत्त्वोभविष्यति। कुतः कायधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे कायधातुतथता भविष्यति। कुतोऽकायधातु तथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः स्प्रष्टव्यधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र स्प्रष्टव्यधातुतथताया बोधिसत्त्वोभविष्यति। कुतः स्प्रष्टव्यधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे स्प्रष्टव्य धातुतथता भविष्यति। कुतोऽस्प्रष्टव्यधातुतथतो बोधिसत्त्वो भविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः कायविज्ञानधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र कायविज्ञानधातुतथताया बोधिसत्त्वोभविष्यति। कुतः कायविज्ञानधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे कायविज्ञानधातुतथता भविष्यति। कुतोऽकायविज्ञानधातुतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतो मनोधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र मनोधातुतथतायाबोधिसत्त्वोभविष्यति। कुतोमनोधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे मनोधातुतथता भविष्यति। कुतोऽमनोधातुतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोधर्म्मधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र धर्म्मधातुतथतायाबोधिसत्त्वोभविष्यति। कुतोधर्म्मधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे धर्म्मधातुतथता भविष्यति। कुतोऽधर्म्मधातुतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोमनोविज्ञानधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र मनोविज्ञानधातुतथतायाबोधिसत्त्वोभविष्यति। कुतोमनोविज्ञानधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे मनोविज्ञानधातुतथताभविष्यति। कुतोऽमनोविज्ञानधातुतथतोबोधिसत्त्वो भविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः पृथिवीधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र पृथिवीधातुतथताया बोधिसत्त्वोभविष्यति। कुतः पृथिवीधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे पृथिवीधातुतथताभविष्यति। कुतोऽपृथिवीधातुतथतो बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत्

कुतोऽब्धातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्राब्धातु-तथताया बोधिसत्त्वोभविष्यति। कुतोऽब्धातुतथतायां बोधिसत्त्वो भविष्यति। कुतोबोधिसत्त्वेऽब्धातुतथताभविष्यति। कुतोऽनब्धातु-तथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतस्तेजोधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र तेजोधातुतथताया बोधिसत्त्वोभविष्यति। कुतस्तेजोधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे तेजोधातुतथताभविष्यति। कुतोऽतेजोधातुतथतो बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोवायुधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र-वायुधातुतथतायाबोधिसत्त्वोभविष्यति। कुतो वायुधातुतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे वायुधातुतथताभविष्यति। कुतोऽवायुधातुतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुत आकाशधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतो-ऽन्यत्राकाशधातुतथतायाबोधिसत्त्वोभविष्यति। कुतआकाशधातु-तथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे आकाशधातुतथता भविष्यति। कुतोऽनाकाशधातुतथतो बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोविज्ञानधातुतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र-विज्ञानधातुतथतायाबोधिसत्त्वोभविष्यति। कुतोविज्ञानधातुतथ-

तायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे विज्ञानधातुतथता भविष्यति। कुतोऽविज्ञानधातुतथतो बोधिसत्त्वो भविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोऽविद्या* तथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्रा-विद्यातथतायाबोधिसत्त्वोभविष्यति। कुतोऽविद्यातथतायां बोधि-सत्त्वोभविष्यति। कुतोबोधिसत्त्वेऽविद्यातथता भविष्यति। कुतोऽन-विद्यातथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः संस्कार† तथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र संस्कारतथाया बोधिसत्त्वोभविष्यति। कुतः संस्कारतथतायां बोधि-सत्त्वोभविष्यति। कुतोबोधिसत्त्वे संस्कारतथताभविष्यति। कुतो-ऽसंस्कारतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोविज्ञान‡ तथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र विज्ञानतथतायाबोधिसत्त्वोभविष्यति। कुतोविज्ञानतथतायां बोधि-सत्त्वोभविष्यति। कुतोबोधिसत्त्वे विज्ञानतथताभविष्यति। कुतो-ऽविज्ञानतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत्

---

* क्षणिकेषु स्थिरत्वबुद्धिरविद्या।

† रागद्वेषमोहाः संस्कारा भवन्ति।

‡ गर्भस्थस्याद्यं विज्ञानमुत्पद्यते"। तदेवात्रविज्ञान शब्दार्थत्वेनाभि-प्रेतम्।

कुतोनामरूप*तथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र-नामरूपतथताया बोधिसत्त्वोभविष्यति। कुतोनामरूपतथतायां बोधिसत्त्वोभविष्यति। कुतो बोधिसत्त्वे नामरूपतथताभविष्यति। कुतोऽनामरूपतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः† षड़ायतनतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्रषड़ायातनतथतायाबोधिसत्त्वोभविष्यति। कुतः षड़ायतनतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे षड़ायतनतथताभविष्यति। कुतोऽषड़ायतनतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतः‡ स्पर्शतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र स्पर्शतथतायाबोधिसत्त्वोभविष्यति। कुतः स्पर्शतथतायां बोधिसत्त्वोभविष्यति। कुतोबोधिसत्त्वे स्पर्शतथता भविष्यति। कुतोऽस्पर्शतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोवेदनातथता§ऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र-

---

* पृथिव्यादिचतुष्टयं नामाश्रयत्वान्नाम भवति। ततोरूपं सितासितात्मकं शुक्रशोणितं निष्पद्यते। गर्भस्थकलल बुद्बुदावस्थानामरूपशब्दार्थ इति निष्कर्ष इति वेदान्तभाष्य टीकारत्न प्रभा।

† विज्ञानं पृथिव्यादिचतुष्टयं रूपञ्चेति षड़ायतनानि यस्येन्द्रियजातस्य तत् षड़ायतनम्।

‡ नामरूपेन्द्रियाणां मिथः संयोगः स्पर्शः॥

§ सुखादिका वेदना।

वेदनातथतायाबोधिसत्त्वोभविष्यति। कुतोवेदनातथतायां बोधि-सत्त्वोभविष्यति। कुतोबोधिसत्त्वे वेदनातथता भविष्यति। कुतो-ऽवेदनातथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतस्तृष्णा* तथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्र तृष्णातथतायाबोधिसत्त्वोभविष्यति। कुतस्तृष्णातथतायां बोधि-सत्त्वोभविष्यति। कुतोबोधिसत्त्वे तृष्णातथता भविष्यति। कुतो-ऽतृष्णातथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतो उपादानतथताऽधिवचनं बोधिसत्त्वोभविष्यति। कुतोऽन्यत्रो-पादानतथतायाबोधिसत्त्वोभविष्यति। कुतउपादान तथतायां बोधि-सत्त्वोभविष्यति। कुतोबोधिसत्त्वे उपादानतथता भविष्यति। कुतो-ऽनुपादानतथतोबोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतोभवतथताऽधिवचनं बोधिसत्त्वोभविष्यति†। कुतोऽन्यत्र भवतथतायाबोधिसत्त्वो भविष्यति। कुतोभवतथतायां बोधिसत्त्वो-भविष्यति। कुतोबोधिसत्त्वे भवतथताभविष्यति। कुतो ऽभवतथतो-बोधिसत्त्वोभविष्यति।

---

* "तया पुनर्विषय तृष्णा"। विषय भोगेच्छा इति यावत्।

† "तया प्रवृत्तिरुपादानम्"। विषयभोगेच्छाजनिता प्रवृत्तिरुपादान-मित्यर्थः।

‡ "तेन भवत्यस्माज्जन्मेति भवोधर्म्मादिः"। प्रवृत्तिजन्योधर्म्माधर्म्मौ भवशब्दार्थः।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते। तत् कुतो जातितथताऽधिवचनं बोधिसत्त्वोभविष्यति*। कुतोऽन्यत्र-जातितथताया बोधिसत्त्वोभविष्यति। कुतोजातितथतायां बोधि-सत्त्वोभविष्यति। कुतोबोधिसत्त्वे जातितथता भविष्यति। कुतो-ऽजतितथतो बोधिसत्त्वो भविष्यति।

अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते तत् कुतो जरामरणतथताऽधिवचनं बोधिसत्त्वो भविष्यति। कुतोऽन्यत्र† जरा-मरणतथताया बोधिसत्त्वोभविष्यति। कुतोजरामरणतथतायां बोधिसत्त्वोभविष्यति। कुतो बोधिसत्त्वे जरामरणतथताभविष्यति। कुतोऽजरामरणतथतोबोधिसत्त्वोभविष्यति।

भगवानाह। साधु साधु सुभूते एवं खलुसुभूते बोधिसत्त्वेन महासत्त्वेन सत्त्वाऽनुपलब्धितायां प्रज्ञापारमिताऽनुपलब्धितायां शिचितव्यम्। यत्पुनः सुभूतिरेवमाह। कतमस्यैतद्धर्मस्याऽधिवचनं यदुतबोधिसत्त्वइति। तत् किं मन्यसे सुभूते रूपस्यैतदधिवचनं‡ बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते वेदनायाएतदधिवचनं बोधिसत्त्वइति। आह

---

* जाति देहजन्य पञ्चस्कन्धसमुदाय इति यावत्।

† "जातानां स्कन्धानां परिपाको जरास्कन्धः। नाशोमरणमितिरत्नप्रभा।

‡ अधिवचनं वाचकं। बोधिसत्त्व इति पदं। रूपादि पदार्थानां तदीयनित्यताऽनित्यत्वादिधर्म्माणाञ्च वाचकत्वं बोधिसत्त्वशब्दस्यनास्तीति सुभूति नैवप्रकाशयितुं भगवान् एच्छति तत् किं मन्यसे इत्यादिनारूपादीनां तद्धर्म्माणाञ्चासत्यतया तद्वाचकत्वं बोधिसत्त्व शब्दस्यनास्ती"ति भावः।

नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संज्ञाया-एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संस्काराणामेतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगावानाह तत् किं मन्यसे सुभूते विज्ञान-स्यैतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते रूपनित्यताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते रूपा-ऽनित्यताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते वेदनानित्यतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते वेदनाऽनित्यताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संज्ञानित्य-ताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संज्ञाऽनित्यतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संस्कारनित्यतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संस्कारा-ऽनित्यताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते विज्ञाननित्यतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह। तत् किं मन्यसे सुभूते विज्ञानाऽनित्यतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्।

भगवानाह तत् किं मन्यसे सुभूते रूपसुखतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते रूपदुःखतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते वेदनासुखतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते वेदनादुःखताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीद भगवन्। भगवानाह तत् किं मन्यसे सुभूते संज्ञासुखतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संज्ञादुःखताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संस्कारसुखतायाएतदधिवचनं बोधिमत्त्व इति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संस्कारदुःखताया एतदधिवचनं बोधिमत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते विज्ञानसुखताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते विज्ञान दुःखताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्।

भगवानाह तत् किं मन्यसे सुभूते रूपाऽऽत्मतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते रूपाऽनात्मतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते वेदनाऽऽत्मतायाएतदधिवचनं बोधसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत्

किं मन्यसे सुभूते वेदनाऽनात्मताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संज्ञाऽऽत्मतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संज्ञाऽनात्मतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संस्काराऽऽत्मतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संस्काराऽनात्मतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते विज्ञानाऽऽत्मतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते विज्ञानाऽनात्मताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्।

भगवानाह तत् किं मन्यसे सुभूते रूपशान्ततायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते रूपाऽशान्ततायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते वेदनाशान्ततायाएतदधिवचनं बोधिसत्त्वइति। आह नोहिदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते वेदनाऽशान्ततायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संज्ञाशान्तताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संज्ञाऽशान्तताया एतदधिवचनं बोधिसत्त्वइति। आह नोहोदं भगवन्।

भगवानाह। तत् किं मन्यसे सुभूते संस्कारशान्तताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संस्कराऽशान्ततायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते विज्ञानशान्तताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते विज्ञानाऽशान्तताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्।

भगवानाह तत् किं मन्यसे सुभूते रूपशून्यतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते रूपाऽशून्यतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते वेदनाशून्यताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते वेदनाऽशून्यतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संज्ञाशून्यताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संज्ञाऽशून्यतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संस्कार शून्यतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संस्काराऽशून्यताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते विज्ञानशून्यतायाएतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्।

भगवानाह तत् किं मन्यसे सुभूते विज्ञानाऽशून्यताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्।

भगवानाह तत् किं मन्यसे सुभूते रूपनिमित्तताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते रूपाऽनिमित्तताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते। वेदना निमित्तताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते वेदनाऽनिमित्तताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संज्ञाऽनिमित्तताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संस्कार निमित्तताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संस्काराऽनिमित्तताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते विज्ञाननिमित्तताया एतदधिवचनं बोधिसत्त्वइति आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते विज्ञानाऽनिमित्तताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्।

भगवानाह तत् किं मन्यसे सुभूते रूपप्रणिहितताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते रूपाऽप्रणिहितताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते

वेदनाप्रणिहितताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते वेदनाऽप्रणिहितताया-एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संज्ञाप्रणिहितताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संज्ञाऽप्रणिहितताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीद भगवन्। भगवानाह तत् किं मन्यसे सुभूते संस्कारप्रणिहितताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते संस्काराऽप्रणिहितताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते विज्ञानप्रणिहितताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्। भगवानाह तत् किं मन्यसे सुभूते विज्ञानाऽप्रणिहितताया एतदधिवचनं बोधिसत्त्वइति। आह नोहीदं भगवन्।

[१]अत्यन्ततया भगवन् रूपं न संविद्यते नोपलभ्यते। कुतो

---

(१) पूर्व्वं बोधिसत्त्वशब्दस्य रूपाद्यधिवचनत्वं निराकृत। सम्प्रति तत्र हेतुं प्रदर्शयति अत्यन्ततयेत्यादिना। यतोरूपादीनामत्यन्ततया विद्यमानत्वाभावः उपलब्धेरभावश्च कुतस्तेषामलीकानां शशविषाणादिकल्पनां वाचकं बोधिसत्त्वेति नाम भवेदिति सुभूतेरभिप्रायः। न संविद्यते इत्यनेनैवार्थसिद्धौ नोपलभ्यते इत्यभिधानं व्यर्थमिति न वाच्यं उपलब्धेरभावेन विद्यमानत्वाभावः साधितः। अभाव प्रत्यक्षे उपलब्धेरभावस्य हेतुत्वमुक्तं भाषापरिच्छेदे। "विशेषणतया तद्वदभावानां ग्रहोभवेत्। यदिस्या दुप-

रूपाऽधिवचनं बोधिसत्त्वोभविष्यति । अत्यन्ततया भगवन् वेदना न संविद्यते नोपलभ्यते । कुतोवेदनाऽधिवचनं बोधिसत्त्वोभविष्यति । अत्यन्ततया भगवन् संज्ञा न संविद्यते नोपलभ्यते । कुतः संज्ञाऽधिवचनं बोधिसत्त्वोभविष्यति । अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते । कुतः संस्कारा धिवचनं बोधिसत्त्वोभविष्यति । अत्यन्ततया भगवन् बोधिसत्त्वो न संविद्यते नोपलभ्यते । कुतो विज्ञानाऽधिवचनं बोधिसत्त्वोभविष्यति । अत्यन्ततया भगवन् रूपनित्यता न संविद्यते नोपलभ्यते । कुतोरूपनित्यताऽधिवचनं बोधिसत्त्वोभविष्यति । अत्यन्ततया भगवन् रूपाऽनित्यता न संविद्यते नोपलभ्यते । कुतोरूपाऽनित्यताऽधिवचनं बोधिसत्त्वोभविष्यति । अत्यन्ततया भगवन् वेदनानित्यतान संविद्यते नोपलभ्यते । कुतो वेदनानित्यताऽधिवचनं बोधिसत्त्वोभविष्यति । अत्यन्ततया भगवन् वेदनाऽनित्यता न संविद्यते नोपलभ्यते । कुतो वेदनाऽनित्यताऽधिवचनं बोधिसत्त्वोभविष्यति । अत्यन्ततया भगवन् संज्ञानित्यता न संविद्यते नोपलभ्यते । कुतः संज्ञानित्यताऽधिवचनं बोधिसत्त्वोभविष्यति ।

लभ्येत एवं यत्र प्रसज्यते" इति । अनुपलब्धेः स्वतन्त्र प्रमाणत्वं मीमांसकैः स्वीकृतम् ।

पूर्व्वं रूपनित्यता रूपसुखता इत्यादि धर्म्मपरनिर्द्देशेन निराकृतम् इहापिनित्यताऽनित्यताविवरणे धर्म्मपर एव निर्द्देशो दृश्यते । सुखदुःखादौ तु तद्वैषम्यं दृश्यते पूर्व्वानुसारेण सुखतादुःखता इत्यादि निर्द्देशोयुक्तः प्रतिभाति ।

अत्यन्ततया भगवन् संज्ञाऽनित्यता न संविद्यतेनोपलभ्यते। कुतः संज्ञाऽनित्यताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् संस्कारनित्यता न संविद्यते नोपलभ्यते। कुतः संस्कारनित्यताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् संस्काराऽनित्यता न संविद्यते नोपलभ्यते। कुतः संस्काराऽनित्यताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् विज्ञाननित्यता न संविद्यते नोपलभ्यते। कुतोविज्ञाननित्यताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् विज्ञानाऽनित्यता न संविद्यते नोपलभ्यते। कुतो विज्ञानाऽनित्यताऽधिवचनं बोधिसत्त्वोभविष्यति।

"अत्यन्ततया भगवन् रूपसुखं" न संविद्यते नोपलभ्यते। कुतः रूपसुखाऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् रूप दुःखं न संविद्यते नोपलभ्यते। कुतोरूपदुःखाऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् वेदनासुखं न संविद्यते नोपलभ्यते। कुतोवेदनासुखाऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् वेदनादुःखं न संविद्यते नोपलभ्यते। कुतो वेदनादुःखाऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् संज्ञासुखं न संविद्यते नोपलभ्यते। कुतः संज्ञासुखाऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्तया भगवन् संज्ञादुखं न संविद्यते नोपलभ्यते। कुतः संज्ञादुःखाऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् संस्कारसुखं न संविद्यते नोपलभ्यते। कुतः संस्कारसुखाऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् संस्कारदुःखं न संविद्यते नोपलभ्यते। कुतः संस्कारदुःखाऽधिवचनं बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् विज्ञानसुखं न संविद्यते नोपलभ्यते। कुतो-विज्ञानसुखाऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् विज्ञानदुःखं न संविद्यते नोपलभ्यते। कुतोविज्ञानदुःखाऽधिवचनं बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् रूपात्मा न संविद्यते नोपलभ्यते। कुतो रूपात्माऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् नैरात्म्यं न संविद्यते नोपलभ्यते। कुतो रूपनैरात्म्याऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् वेदनाऽऽत्मा न संविद्यते नोपलभ्यते। कुतो वेदनात्माऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् नैरात्म्यं न संविद्यते नोपलभ्यते। कुतोवेदनानैरात्म्याऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् संज्ञात्मा न संविद्यते नोपलभ्यते। कुतः संज्ञात्माऽधिवचन बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् संज्ञानैरात्म्यं न संविद्यते नोपलभ्यते। कुतः संज्ञानैरात्म्याऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् संस्कारात्मा न संविद्यते नोपलभ्यते। कुतः संस्कारात्माऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् संस्कारनैरात्म्यं न संविद्यते नोपलभ्यते। कुतः संस्कारनैरात्म्याऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् विज्ञानात्मा न संविद्यते नोपलभ्यते। कुतो-

---

* पूर्व्वं रूपात्मना रूपानात्मता इत्यादिरूपेण निर्द्देशो दृश्यते इहतु केवलमात्मेति नैरात्म्येति पाठः सर्व्वत्र दृश्यते। पूर्व्ववदेव निर्द्देशो ऽत्रापि युक्तः।

विज्ञानात्माऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् विज्ञाननैरात्म्यं न संविद्यते नोपलभ्यते। कुतो विज्ञाननैरात्म्याऽधिवचनं बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् शान्तं न विद्यते नोपलभ्यते। कुतो रूपशान्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् अशान्तं न संविद्यते नोपलभ्यते। कुतो रूपाऽशान्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् शान्तं न संविद्यते नोपलभ्यते। कुतोवेदनाशान्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् अशान्तं न संविद्यते नोपलभ्यते। कुतोऽवेदनाऽशान्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् शान्तं न संविद्यते नोपलभ्यते। कुतः संज्ञाशान्ताऽधिवचनं बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् अशान्तं न संविद्यते नोपलभ्यते। कुतः संज्ञाऽशान्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् शान्तं न संविद्यते नोपलभ्यते। कुतः संस्कारशान्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् अशान्तं न संविद्यते नोपलभ्यते। कुतः संस्काराऽशान्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् शान्तं न संविद्यते नोपलभ्यते। कुतोविज्ञानशान्ताऽधिवचनं बोधिसत्त्वो भविष्यति। अत्यन्ततया भगवन् अशान्तं न संविद्यते नोपलभ्यते। कुतो विज्ञानाशान्ताऽधिवचनं बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् शून्यं न संविद्यते नोपलभ्यते। कुतो रूपशून्याऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् अशून्यं

न संविद्यते नोपलभ्यते। कुतोवेदनाशून्याऽधिवचनं बोधिसत्त्वो-भविष्यति। अत्यन्ततया भगवन् अशून्यं न संविद्यते नोपलभ्यते। कुतोवेदनाऽशून्याऽधिवचनं बोधिसत्त्वो भविष्यति। अत्यन्ततया भगवन् शून्यं न संविद्यते नोपलभ्यते। कुतः संज्ञाशून्याऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् अशून्यं न संविद्यते नोपलभ्यते। कुतो संज्ञाऽशून्याधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् शून्यं न संविद्यते नोपलभ्यते। कुतः संस्कार-शून्याऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् अशून्यं न संविद्यते नोपलभ्यते। कुतः संस्काराऽशून्याऽधिवचनं बोधिसत्त्वो-भविष्यति। अत्यन्ततया भगवन् शून्यं न संविद्यते नोपलभ्यते। कुतोविज्ञानशून्याऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् अशून्यं न संविद्यते नोपलभ्यते। कुतोविज्ञानाशून्याऽधिवचनं बोधिसत्त्वोभविष्यति।

अत्यन्ततया निमित्तं न संविद्यते नोपलभ्यते। कुतोरूप-निमित्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन्-निमित्तं न संविद्यते नोपलभ्यते। कुतोरूपाऽनिमित्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् निमित्तं न संविद्यते नोपलभ्यते। कुतोवेदनानिमित्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् निमित्तं न संविद्यते नोपलभ्यते। कुतोवेदना ऽनिमित्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् निमित्तं न संविद्यते नोपलभ्यते। कुतः संज्ञानिमित्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् निमित्तं न संविद्यते

न संविद्यते नोपलभ्यते। कुतोरूपाऽशून्याऽधिवचनं बोधिसत्त्वो-भविष्यति। कुतः संज्ञाऽनिमित्ताधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् निमित्तं न संविद्यते नोपलभ्यते। कुतः संस्कार-निमित्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् निमित्तं न संविद्यते नोपलभ्यते। कुतः संस्कारानिमित्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् निमित्तं न संविद्यते नोपलभ्यते। कुतोविज्ञाननिमित्ताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् निमित्तं न संविद्यते नोपलभ्यते। कुतोविज्ञाना-ऽनिमित्ताऽधिवचनं बोधिसत्त्वोभविष्यति।

अत्यन्ततया भगवन् प्रणिहितं न संविद्यते नोपलभ्यते। कुतो-रूपप्रणिहिताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् प्रणिहितं न संविद्यते नोपलभ्यते। कुतोरूपाऽप्रणिहिताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् प्रणिहितं न संविद्यते नोपलभ्यते। कुतोवेदनाप्रणिहिताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् प्रणिहितं न संविद्यते नोपलभ्यते। कुतोवेदना-ऽप्रणिहिताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् प्रणिहितं न संविद्यते नोपलभ्यते। कुतः संज्ञाप्रणिहिताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् प्रणिहितं न संविद्यते नोपलभ्यते। कुतः संज्ञाऽप्रणिहिताधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् प्रणिहितं न संविद्यते नोपलभ्यते। कुतः संस्कारप्रणिहिताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् प्रणिहितं न संविद्यते नोपलभ्यते। कुतः संस्काराप्रणिहिताऽधि-

वचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् प्रणिहितं न संविद्यते नोपलभ्यते। कुतोविज्ञानप्रणिहिताऽधिवचनं बोधिसत्त्वोभविष्यति। अत्यन्ततया भगवन् प्रणिहितं न संविद्यते नोपलभ्यते। कुतोविज्ञान प्रणिहिताधिवचनं बोधिसत्त्वोभविष्यति ।

भगवानाह। साधु साधु सुभूते एवं खलु सुभूते बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरतारूपाऽधिवचनमनुपलम्भमानेन वेदनाऽधिवचनमनुपलम्भमानेन संज्ञाऽधिवचनमनुपलम्भमानेन संस्काराऽधिवचनमनुपलम्भमानेन विज्ञानाऽधिवचनमनुपलम्भमानेन। रूपनित्याऽधिवचनमनुपलम्भमानेन रूपाऽऽनित्याऽधिवचनमनुपलम्भमानेन वेदनानित्याऽधिवचन मनुपलम्भमानेन वेदनाऽनित्याऽधिवचनमनुपलम्भमानेन संज्ञानित्याऽधिवचनमनुपलम्भमानेन संज्ञाऽनित्याऽधिवचनमनुपलम्भमानेन संस्कारनित्याऽधिवचनमनुपलम्भमानेन संस्काराऽनित्याऽअधिवचनमनुपलम्भमानेन विज्ञाननित्याऽधिवचनमनुपलम्भमानेन विज्ञानाऽनित्याऽधिवचनमनुपलम्भमानेन। रूपसुखाऽधिवचनाऽनुपलम्भमानेन रूपदुःखाऽधिवचनमनुपलम्भमानेन वेदनासुखाऽधिवचनमनुपलम्भमानेन वेदनादुःखाऽधिवचनमनुपलम्भमानेन। संज्ञासुखाऽधिवचनमनुपलम्भमानेन संज्ञादुःखाऽधिवचनमनुपलम्भमानेन संस्कारसुखाऽधिवचनमनुपलम्भमानेन संस्कारदुःखाऽधिवचनमनुपलम्भमानेन विज्ञानसुखाऽधिवचनमनुपलम्भमानेन विज्ञानदुःखाऽधिवचनमनुपलम्भनानेन। रूपात्माऽधिवचनमनुपलम्भमानेन रूपानात्माऽधिवचनमनुपलम्भमानेन वेदनात्माऽधिवचनमनुपलम्भमानेन वेदनानात्माऽधिवचनमनुपलम्भमानेन संज्ञात्माऽधि-

वचनमनुपलभ्यमानेन संज्ञानात्माऽधिवचनमनुपलभ्यमानेन संस्कारा-त्माऽधिवचनमनुपलभ्यमानेन संस्कारानात्माऽधिवचनमनुपलभ्यमानेन विज्ञानात्माऽधिवचनमनुपलभ्यमानेन विज्ञानानात्माऽधिवचनमनुप-लभ्यमानेन रूपशान्ताऽधिवचनमनुपलभ्यमानेन रूपाशान्ताऽधिवचन-मनुपलभ्यमानेन वेदनाशान्ताऽधिवचनमनुपलभ्यमानेन वेदना-ऽशान्ताऽधिवचनमनुपलभ्यमानेन संज्ञाशान्ताऽधिवचनमनुपलभ्य-मानेन संज्ञाऽशान्ताऽधिवचनमनुपलभ्यमानेन संस्कारशान्ताऽधिवच-नमनुपलभ्यमानेन संस्काराऽशान्ताऽधिवचनमनुपलभ्यमानेन विज्ञान-शान्ताऽधिवचनमनुपलभ्यमानेन विज्ञानाऽशान्ताऽधिवचनमनुपलभ्य-मानेन रूपशून्याऽधिवचनमनुपलभ्यमानेन रूपाशून्याधिवचनमनुप-लभ्यमानेन वेदनाशून्याऽधिवचनमनुपलभ्यमानेनवेदनाऽशून्याऽधि-वचनमनुपलभ्यमानेन संज्ञाशून्याऽधिवचनमनुपलभ्यमानेन संज्ञा-ऽशून्याऽधिवचनमनुपलभ्यमानेन संस्कारशून्याऽधिवचनमनुपलभ्य-मानेन संस्काराऽशून्याधिवचनमनुपलभ्यमानेन विज्ञानशून्याऽधि-वचनमनुपलभ्यमानेन विज्ञानाऽशून्याऽधिवचनमनुपलभ्यमानेन। रूपनिमित्ताऽधिवचनमनुपलभ्यमानेन रूपाऽनिमित्ताऽधिवचनमनु-पलभ्यमानेन वेदनानिमित्ताऽधिवचनमनुपलभ्यमानेन वेदना-ऽनिमित्ताऽधिवचनमनुपलभ्यमानेन। संज्ञानिमित्ताऽधिवचनमनुप-लभ्यमानेन संज्ञाऽनिमित्ताऽधिवचनमनुपलभ्यमानेन संस्कारानिमि-त्ताऽधिवचनमनुपलभ्यमानेन संस्काराऽनिमित्ताऽधिवचनमनुपलभ्य-मानेन विज्ञाननिमित्ताऽधिवचनमनुपलभ्यमानेन विज्ञाननिमित्ता-ऽधिवचनमनुपलभ्यमानेन रूपप्रणिहिताऽधिवचनमनुपलभ्यमानेन

रूपाऽप्रणिहिताऽधिवचनमनुपलम्भमानेन वेदनाप्रणिहिताऽधिवचन-मनुपलम्भमानेन वेदनाऽप्रणिहिताऽधिवचनमनुपलम्भमानेन संज्ञा-प्रणिहिताऽधिवचनमनुपलम्भमानेन संज्ञाऽप्रणिहिताऽधिवचनमनुप-लम्भमानेन संस्कारप्रणिहिताऽधिवचनमनुपलम्भमानेन संस्कारा-ऽप्रणिहिताऽधिवचनमनुपलम्भमानेन विज्ञानप्रणिहिताऽधिवचनमनु-पलम्भमानेन विज्ञानाऽप्रणिहिताऽधिवचनमनुपलम्भमानेन प्रज्ञापार-मितायां शिक्षितव्यम् ।

यत् पुनः सुभूते वदसि नाहं धर्मं समनुपश्यामि यदुत बोधि-सत्त्वइति । न सुभूते धर्मोधर्मधातुं समनुपश्यति । न संज्ञा धातु-र्धर्मधातुं समनुपश्यति । न धर्मधातुः सञ्ज्ञाधातुं समनुपश्यति । न संस्कारधातुर्धर्मधातुं समनुपश्यति । न धर्मधातुः संस्कारधातुं समनुपश्यति । न विज्ञानधातुर्धर्मधातुं समनुपश्यति । न धर्म-धातुर्व्विज्ञानधातुं समनुपश्यति । न चक्षुर्धातुर्धर्मधातुं समनुपश्यति । न धर्मधातुश्चक्षुधातुं समनुपश्यति । न श्रोत्रधातुर्धर्मधातुं समनु-पश्यति । न धर्मधातुः श्रोत्रधातुं समनुपश्यति । न घ्राणधातुर्धर्मधातुं समनुपश्यति । न धर्मधातुर्घ्राणधातुं समनुपश्यति । न जिह्वा धातुर्धर्मधातुं समनुपश्यति । न धर्मधातु जिह्वाधातुं समनु-पश्यति । न कायधातुर्धर्मधातुं समनुपश्यति । न धर्मधातुः कायधातुं समनुपश्यति । न मनोधातुर्धर्मधातुं समनुपश्यति । न धर्मधातुर्म्मनोधातुं समनुपश्यति ।

न सुभूते संस्कृतधातुरसंस्कृतधातुं समनुपश्यति । नाऽसंस्कृत धातुः संस्कृतधातुं समनुपश्यति । न च संस्कृतधातुव्यतिरेकेणा-

संस्कृतं शक्यं प्रज्ञपयितुं। नाऽसंस्कृतव्यतिरेकेन संस्कृतधातुः शक्यः प्रज्ञपयितुं। एवं खलु सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न कञ्चिद्धर्म्मं समनुपश्यति। असमनुपश्यन् नोत्त्रस्यति। न सन्त्रस्यति न सन्त्रासमापद्यते। न वास्य कस्मिंश्चिद्धर्म्मेचित्तमवलीयते। न विप्रतिसारीभवति मानसं। तत् कस्य हेतोस्तथाहि सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न रूपं समनुपश्यति। वेदनां न समनुपश्यति। संज्ञां न समनुपश्यति। संस्कारान्न समनुपश्यति। विज्ञानं न समनुपश्यति। चक्षुर्न समनुपश्यति। श्रोत्रं न समनुपश्यति। घ्राणं न समनुपश्यति। जिह्वां न समनुपश्यति। कायं न समनुपश्यति। मनो न समनुपश्यति। रूपं न समनुपश्यति। शब्दं न समनुपश्यति। गन्धं न समनुपश्यति। रसं न समनुपश्यति। स्पर्शं न समनुपश्यति। धर्म्मं न समनुपश्यति। पृथिवीधातुं न समनुपश्यति। अब्धातुं न समनुपश्यति। तेजोधातुं न समनुपश्यति। वायुधातुं न समनुपश्यति। आकाशधातुं न समनुपश्यति। विज्ञानधातुं न समनुपश्यति। अविद्यां न समनुपश्यति। संस्कारान्न समनुपश्यति। विज्ञानं न समनुपश्यति। नामरूपं न समनुपश्यति। षड़ायतनं न समनुपश्यति। स्पर्शं न समनुपश्यति। वेदनां न समनुपश्यति। तृष्णां न समनुपश्यति। उपादानं न समनुश्यति। भवं न समनुपश्यति। जातिं न समनुपश्यति। जरामरणं न समनुपश्यति। रागं न समनुपश्यति। द्वेषं न समनुपश्यति। मोहं न समनुपश्यति। आत्मानं न समनुपश्यति। सत्वं न समनुपश्यति। जीवं न समनुपश्यति। जन्तुं न समनु-

पश्यति। पोषं न समनुपश्यति। पुरुषं न समनुपश्यति। मनुजं न समनुपश्यति। मानवं न समनुपश्यति। कारकं न समनुपश्यति। कारापकं न समनुपश्यति। वेदकं न समनुपश्यति। वेदयितृकं न समनुपश्यति। जानकं न समनुपश्यति। पश्यकं न समनुपश्यति। कामधातुं न समनुपश्यति। रूपधातुं न समनुपश्यति। आरूप्यधातुं न समनुपश्यति। श्रावकचित्तं न समनुपश्यति। प्रत्येकबुद्धचित्तं न समनुपश्यति। बोधिचित्तं न समनुपश्यति। श्रावकधर्म्मान्न समनुपश्यति। प्रत्येकबुद्धं न समनुपश्यति। प्रत्येकबुद्धधर्म्मान्न समनुपश्यति। बोधिसत्त्वं न समनुपश्यति। बोधिसत्त्वधर्म्मान्न समनुपश्यति। बुद्धं न समनुपश्यति। बुद्धधर्म्मान्न समनुपश्यति। बोधिं न समनुपश्यति। यावत् सर्व्वधर्म्मान् लौकिकलोकोत्तरान् न समनुपश्यति। स सर्व्वधर्म्मान्न समनुपश्यति। न मन्यस्यति। न मन्या-समापद्यते।

आह केन कारणेन भगवन् बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञा-पारमितायां चरतः सर्व्वधर्म्मेषु चित्तं नाऽवलीयते। न संलीयते। भगवानाह। तथाहि सुभूते बोधिसत्त्वोमहासत्त्वश्चित्तचैतसिकान् धर्म्मान् नोपलभते न समनुपश्यति। अनेन कारणेन सुभूते बोधि-सत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतः सर्व्वेषु धर्म्मेषु चित्तं नाऽवलीयते। न संलीयते। आह। कथं भगवन् बोधिसत्त्वस्य महासत्त्वस्य मनोन मन्यासमापद्यते*। भगवानाह। तथाहि सुभूते

---

* चैतसिकाश्चित्तसम्बन्धिनः आह उकाररागद्वेषादयः तान् धर्म्मान् नोपलभते अतः कारणाद्बोधिसत्त्वस्य चित्तं। कुत्रापि नावलीयते न

बोधिसत्त्वोमहासत्त्वोमनश्च मनोधातुञ्च नोपलभते। न समनुपश्यति। एवं खलु सुभूते बोधिसत्त्वस्य महासत्त्वस्य मनोन सन्त्रासमापद्यते। एवं हि सुभूते बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरितव्यं। स चेत् पुनः सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरं स्तां प्रज्ञापारमितां नोपलभतेतञ्च बोधिसत्त्वं नोपलभते। तच्च बोधिसत्त्वनाम नोपलभते। एवमेव बोधिसत्त्वस्याऽववादः। एषैवाऽनुशासनी।

शतसाहस्रयाः प्राज्ञापारमिताया द्वितीयः परिवर्त्तः ॥

तदाकारां वृत्तिं भजते। इत्यर्थः। तथा च भाव्यनिष्टस्वरूपशङ्का सन्त्रासपदार्थस्याहङ्काराभावेनाऽसम्भवः नह्युदासीनस्य दुःखसम्भावनायां कश्चित् त्रस्यसि किन्तु स्वस्य स्वकीयस्य वा। तत्र ममेत्यहङ्कार एव हेतुः। उदासीने अहङ्काराभावात् न त्रासोदयः। एवमत्राऽपि बोधिसत्त्वस्य रूपादिस्कन्धे अहमित्यभिमानाभावाच्चक्षुरादौ च ममेत्यभिमानाभावात् तेषामनिष्टसम्भावना बोधिसत्त्वस्य न त्रासञ्जनयतीति भगवतोऽभिप्रायः। एतदभिप्रायकमेवोदाहृतत्त्वष्टं वचनं यथा। "प्राणे गते यथा देहः सुखदुःखे न विन्दति। तथा चेत् प्राणयुक्तोऽपि सकैवल्याश्रमेवसेदि"ति। तज्जः संस्कारोऽन्य संस्कारप्रतिवन्धी। १। ५१। "तस्यापि निरोधे सर्व्वनिरोधान्निर्वीजः समाधिरि"ति। १। ५२। पातञ्जलदर्शनसमाधिपादसूत्राभ्यामीदृश एवार्थः प्रकटितः॥

अथ तृतीयपरिवर्त्तः ।

अथायुष्मान् सुभूतिर्भगवन्त मेतदवोचत् । रूपं भगवन् परिज्ञा* तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम् । वेदनां भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम् । संज्ञां भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम् । संस्कारान् भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम् । विज्ञानं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम् । चक्षुर्भगवन् परिज्ञातुकामेन बोधि-

* अत्रायमभिप्रायः । सर्वो हि अविद्यावशेन रूपादीनां पारमार्थिकसत्वं प्रतिसन्धाय तत्राऽभिनिविशते सति च सुदृढे ऽभिनिवेशेन युगसहस्रेणापि तेषामनुपशम्भः शक्यः सम्भावयितुं । ततश्च पूर्वपरिवर्त्तकृतोपदेशोविफल एव भवति । अतस्तदुपपादनाय रूपादीनां स्वरूपपरिज्ञानमत्रोपदिशति । वस्तुतत्व पर्य्यालोचनेकृतेरूपादीनामसत्यतैवपरिशिष्येत । तथा च सति न कश्चित् तत्राऽभिनिविशेत । नह्युदकचन्द्रमाहर्तुं कश्चित् प्रेक्षावान् प्रवर्त्तते । तद्वदविद्ययाप्रतिभासमाना अपि रूपादयो न तत्त्वज्ञानां मनांस्यभिभवितु मर्हन्ति । अतस्तृतीय परिवर्त्तस्यादौ रूपादीनां परिज्ञानमेवोपदिशति रूपं भगवन परिज्ञातुकामेनेत्यादिना ।

सत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्। श्रोत्रं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्। घ्राणं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्। जिह्वां भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्। कायं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्। मनोभगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्। रूपं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्। शब्दं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्। गन्धं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्। रसं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्। स्पर्शं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्। धर्म्मान् भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्।

चक्षुर्विज्ञानं* भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्। श्रोत्रविज्ञानं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्। घ्राण विज्ञानं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञा-

* अविद्यादयः पूर्वं व्याख्याताः अविद्यामारभ्य दौर्मनस्य पर्य्यन्तं क्रमिककार्य्यप्रवाहः।

पारमितायां शिक्षितव्यं। जिह्वाविज्ञानं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। कायविज्ञानं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। मनोविज्ञानं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं।

चक्षुः संस्पर्शं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। श्रोत्रसंस्पर्शं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। घ्राणसंस्पर्शं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। जिह्वासंस्पर्शं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। कायसंस्पर्शं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। मनःसंस्पर्शं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यम्।

चक्षुःसंस्पर्शजां वेदनां भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। श्रोत्रसंस्पर्शजां वेदनां भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। घ्राणसंस्पर्शजां वेदनां भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। जिह्वासंस्पर्शजां वेदनां भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। कायसंस्पर्शजां वेदनां भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। मनः संस्पर्शजां

वेदनां भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। *अविद्यां भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। संस्कारान् भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। विज्ञानं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। नामरूपं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। षड़ायतनं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। स्पर्शं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। वेदनां भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। तृष्णां भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। उपादानं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। भवं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। जातिं भगवन् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। †जरामरणशोकपरिदेव दुःखदौर्म्मनस्योपायासान् भगवन् परिज्ञातुकामेनबोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं।

---

* विज्ञानपदं चक्षुरादीन्द्रियजन्यज्ञानपरम्।

† जातानां स्कन्धानां परिपाको जरास्कन्धः। नाशोमरणं, म्रियमाणस्य पुत्रादेः स्नेहादन्तर्दाहः शोकः, तेन हा पुत्रेत्यादि प्रलापः परिदेवना' अनिष्टाऽनुभवोदुःखं तेन दुर्मनस्ता मानसौव्यथा इति रत्नप्रभा।

रागं प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। द्वेषं प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। मोहं प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। सत्कायदृष्टिं प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। विचिकित्सां प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। शीलव्रतपरामर्षं प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। कामरागव्यापादं प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। कामरागं प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अरूपरागं प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। संयोजनानि प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अनुशयान् प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पर्य्युत्थानानि प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चतुर आहारान् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चतुरो योगान् परिज्ञातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चतुर ओघान् प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चतुरो ग्रन्थान् प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चत्वार्य्युपादानानि प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चतुरो विप्रयासान् प्रहातुकामेन बोधिसत्त्वेन

महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। दशाकुशलान् कर्म्मपथान् प्रहातुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं।

दशकुशलान् कर्म्मपथान् परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चत्वारि ध्यानानि परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चत्वार्य्यप्रमाणानि परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चतस्रः आरूप्यसमापत्तीः परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। पञ्चाऽभिज्ञाः परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। दानपारमिता परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। शीलपारमितां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। क्षान्तिपारमितां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। वीर्य्यपारमितां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। ध्यानपारमितां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। प्रज्ञापारमितां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अध्यात्मशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। वहिर्द्धाशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अध्यात्मवहिर्द्धाशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। शून्यताशून्यतां

परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। महाशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। परमार्थशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। संस्कृतशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। असंस्कृतशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अत्यन्तशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अनवराग्रशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अनवकारशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। प्रकृतिशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। सर्व्वधर्म्मशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। स्वलक्षणशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अनुपलम्भशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अभावशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। स्वभावशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। अभावस्वभावशून्यतां परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। चत्वारिस्मृत्युपस्थानानि परिपूरयितुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां

Padumawati, Fasc. 1–4 @ 2/	Rs.	8	0
Pariçista Parvan, (Text) Fasc. 1–5 @ /6/ each		1	14
Prākrita-Paingalam, Fasc. 1–7 @ /6/ each		2	10
Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Part II, Fasc. 1		0	12
Prākrta Lakṣaṇam, (Text) Fasc. 1		1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /6/ each		7	8
Parāçara, Institutes of (English)		0	12
Prabandhacintāmaṇi (English) Fasc. 1–3 @ /12/ each		2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.		12	6
Sāṇkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each		1	8
Ditto (English) Fasc. 1–3 @ /12/ each		2	4
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/		0	12
*Taittereya Saṁhitā, (Text) Fasc. 14–45 @ /6/ each		12	0
Tāṇdya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each		7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–12 @ /6/ each		14	10
Trikāṇda-Maṇḍanam, (Text) Fasc. 1–2 @ /6/		0	12
Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each		1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1–5 @ /6/ each ...		1	14
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/		4	8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each		5	4
Varsa Krya Kaumudi, Fasc. 1–6 @ /6/		2	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each		4	8
Vidhons Pariguta Fasc. I		0	6
Viṣṇu Smṛti, (Text) Fasc. 1–2 @ /6/ each		0	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each		2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1–6 @ /6/		2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1–6		2	4

Tibetan Series.

Pag-Sam Ṭhi S'iñ, Fasc. 1–4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each	13	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each	10	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...	4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1–3 @ /12/	2	4
Āīn-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each	37	0
Ditto English Fasc, 1–8 @ 1/ each	8	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each	7	2
Catalogue of Arabic Books and Manuscripts	1	2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each	14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each	3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each	3	6
Ditto of Āzādī, (Text) Fasc. 1–4 @ /6/ each	1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1–10; Index to Vol. I, Fasc. 10–11; Index to Vol. III, Fasc. 11–12; Index to Vol. II, Fasc. 10–12 @ /6/ each	13	2
Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each	1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1-15 @ /6 each ...	Rs.	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 1 @ /12/ each		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1-19 @ /6/ each		7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1-6 @ /6/ each		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1-5 @ /6/ each		1	14
Ditto Ditto (English) Fasc. 1-3		2	4
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1-5 @ /6/ each		1	14
Ditto (English) Fasc. 1-14 @ /12/ each		10	8
Ditto Index		1	0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1-7 @ /6/ each...		2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1-6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each		3	0
Wīs o Rāmīn, (Text) Fasc. 1-5 @ /6/ each		1	14
Ẓafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /6/ each ..		6	6
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) & 1901 (7), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.		
	N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784-1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
9.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I-III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar " "	8	0
16.	Kaçmīraçabdāmṛta, Parts I & II @ 1/8/	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson...	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kaśmir by M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899	4	0

Notices of Sanskrit Manuscripts, Fasc. 1-29 @ 1/ each	29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

12-2-03.

Books are supplied by V.-P P.